2722

बसववचनामृतम्

033,1 F34,1
15K6N

बसवसमितिः

बेङ्गलूर

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

033,1'F34,1 3109
15K6N
Nanjundaradhya,
M G, Tr.
Basav bachana-
mrita

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

3109

SHRI JAGADGURU VISHWARADHYA JNANAMANDIR
(LIBRARY)
JANGAMAWADIMATH, VARANASI

Please return this volume on or before the date last stamped
Overdue volume will be charged 1/- per day.

बसवसमितिः

बेङ्गलूर-९

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

बसववचनामृतम्

(श्री बसवेश्वरस्य १०८ कन्नडवचनानां संस्कृतानुवादः)

वाराणसी - विश्वाराध्य-पीठस्य ज्ञानमन्दिर
संस्थायै समर्प्यते
— एम्. जि. नंजुंडाराध्य
22-11-70

अनुवादकः

आस्थानविद्वान्

एम्. जि. नंजुण्डाराध्यः

प्राध्यापकः, श्रीमन्महाराजसंस्कृतकालेज्, मैसूर.

बसवसमितिः

बेङ्गलूर-९

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रकाशकः
अन्नदानय्य पुराणिकः
प्रधानकार्यदर्शी, बसवसमितिः
'बसवसदनम्', श्री सर्पभूषणशिवयोगीश्वरमठः
बेङ्गलूर-९.

033,1 6F34,1
15 K6N

(सर्वे अधिकाराः स्वायत्तीकृताः)

मूल्यम् ५० पैसे

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY.
Jangamwadi Math, VARANASI
Acc. No. .....
3109

मुद्रकः
प्रभा मुद्रणालयः
बेङ्गलूरु - ४.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स भ क्ति कं

समर्पणम्

भगवतो बसवेश्वरस्य श्रीचरणारविन्देषु
समर्पयितारौ

श्रीमान् आर्. चन्द्रशेखरय्य
श्रीमती आर्. सि. सुब्बम्मा
"उमानिलयः", बेंगलूर-४.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भूमिका

मानवत्वस्य परिपूर्णस्थितेस्सम्पादिका शक्तिराध्यात्मिकी। सैव खलु भारतीयसंस्कृतिः। यस्य खलु पुरुषस्य लोकव्यवहार आध्यात्मिकजीवनादभिन्नो भवति स एव सुसंस्कृतः पुरुष इति वक्तुं युक्तम्। स चाभ्युयदनिःश्रेयसी साधयित्वा स्वजीवनसाफल्यं लभते। एतादृश्यामाध्यात्मिकशक्तौ इच्छा-ज्ञान-क्रियाशक्तीनां त्रिवेणीसङ्गमो दरीदृश्यते। यस्याः कस्या अपि जनतायाः सांस्कृतिक-प्रगतेर्मौल्याङ्कने मानदण्डः खलु आत्मशक्तेर्विकासः।

धर्मस्य प्रधानो ध्येयस्तावन्मानवस्य प्राकृतशक्तीः परिष्कृत्य तासां चोदात्तीकरणम्। अप्राकृतशक्तेरुद्बोधोऽत्र विशिष्यते। संप्रति पाश्चात्येषु विज्ञानस्य प्रगतिर्भूयसी दृश्यते। परन्तु सा आध्यात्मिकीं शक्तिं प्रतिबध्नातीति मन्यन्ते बहवो विपश्चितः। अस्ति भारतीयेष्वपि प्रकृतिविज्ञानम्। अपि तु तदात्मविज्ञानं पूरयितुं परिपोषयितुञ्च विनियोजितं प्राक्तनैर्महर्षिभिः। अस्ति चैतद् वैलक्ष्यण्यं भारतवर्षस्य तदितरदेशेभ्यश्च। अन्येषु खलु राष्ट्रेषु प्रायशो धनं विज्ञानमधिकारो वा सामाजिकगौरवस्य मानदण्डः। अस्मदीये तु भारतवर्षेऽनादिकालादारभ्य वैराग्यस्य, आध्यात्मिक-शक्तेः, मानवकल्याणासक्तेश्च प्राधान्यं दरीदृश्यते।

प्रकृतिविज्ञानमात्मज्ञानस्य सहकारित्वेन संयोजनं भारतीयतत्व-शास्त्राणां सारसर्वस्वम्। वेदोपनिषदः, आगमाः, सांख्यादिदर्शनानि, कर्णाटकभाषामयवचनशास्त्रादितत्त्वग्रन्थाश्च आत्मशक्तेर्विकासेऽधि-तिष्ठन्ति प्रमुखपात्रताम्।

क्रान्तिवीरो बसवेश्वरः

क्रान्तयो हि सर्वत्र सर्वकालेषु संघटन्ते जनजीवनपरिशुद्ध्यै विनूतनसमाजाभिवृद्ध्यर्थं च। शुकराट् (Socrates) अरिस्तातल् (Aristotle) बुद्ध-क्रैस्त-रेणुक-शंकर-मध्व-रामानुजादयो मानवसमाज-सुधारणार्थमवतरिता धर्मक्रान्तिवीरा आचार्या इति परिगणयितुं शक्यते। द्वादशतमशतके कर्णाटकदेशे चालुक्यचक्रेश्वरराजधान्यां कल्याणनगर्यां श्रीबसवेश्वरेण सञ्चालिता नवीनक्रान्तिः। भगवता

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तेन प्रज्वालितमेतत् ज्ञानज्योतिः समस्तमानवसमाजे सर्वतस्ताण्डवायितमज्ञान-अनैक्य-अन्धश्रद्धारूपं कालुष्यमपाकरोत्।

श्री बसवेश्वरस्य क्रान्तेर्मुखानि विविधानि। धार्मिक-सामाजिक-आर्थिक-राजकीय-साहित्यकादि क्षेत्रेषु सद्भावं समुत्पाद्य सर्वाङ्गसुन्दरसमाजनिर्माणस्य भव्यस्वप्नद्रष्टा श्रीबसवेश्वरः प्रकृष्टसमाजसुधारकत्वेन राजते हि लोके। तस्य क्रान्तिकेन्द्रस्तावत् 'शिवानुभवमण्टपः'। वीरविरक्तपुङ्गवस्य श्रीमदल्लमप्रभुदेवस्य नेतृत्वे मण्टपोऽयं संस्थापितः। मण्टपस्यास्य प्रसिद्धिरभिव्याप्ता आसेतु हिमाचलम्। तस्मिंश्च शिवानुभवमण्टपे जिज्ञासवो नानाभागतस्तण्डोपतण्डं समागत्य सम्मिलिताः। तेषु च प्रमुखः काश्मीरदेशप्रभुर्मोलिगे मारय्यः। तत्र चानुभवमण्टपे 'गुणाः पूजास्थानं गुणिषु न च लिंगं न च वयः' इति महाकविभवभूतेरुक्तिश्चरितार्थतां गता। तस्यां च गोष्ठ्यां जिज्ञासवः सुगुणिनः स्त्रीपुरुषाः समानरूपेण समादृताः। सुललितायां कर्णाटकजनपदवाण्यां वेदागमोपानिषदां सारो वचन-गीतरूपेण प्रकटितः। लोकभाषा देवभाषापदं प्रापिता। विनिर्ममे च श्रीबसवेश्वरः 'शिवेतरक्षतये' सत्साहित्यम्। उदघाटयच्च मोक्षद्वारं सर्वेषामपि शिवभक्तिसदाचारसम्पन्नानां मानवानाम्। अबोधयच्च नीचोच्चभावं समूलमुन्मूल्य सर्वेऽपि आत्मोद्धारार्हा धर्माचरणे समानाधिकारिणश्चेति। अन्तरङ्ग-बहिरङ्गशुद्ध्या स्वशक्तेः पूर्णविकासेन नर एव हरो भविष्यतीति सम्यग्दृष्टिस्तेन प्रदत्ता जनसामान्याय। तन्निर्मिते समाजे तावदुद्योगगौरवं प्रधानम्। तदेव कायकमित्युच्यते। त्रिकरणशुद्धिपूर्वकं कृतं कर्मैव कायिकम्। 'कायकमेव कैलासः' तेनैव शिवप्रसादसिद्धिश्चेति बोधयामास। सततोद्यमः, स्वावलम्बनं च सुखमयजीवनस्य मूलमिति प्रतिपादयामास। अत एव पाल्कुरिकि सोमनाथ-काञ्ची शंकराराध्य - मोग्गेमायिदेव - मरितोण्टदार्य-षडक्षरिप्रभृतिभिःप्राचीनकविभिः श्रीबसवेश्वरमधिकृत्य काव्यपुराणादीनि विरचितानि।

बसवसमितिः

शुद्धं समृद्धञ्च समाजं स्थापयितुं भगवता बसवेश्वरेण समनुष्ठितानां तत्त्वानामध्ययनमाचरणं चैकमात्रो मार्गो नान्य इत्यनुचिन्तयद्भिर्महनीयैः भारतीयसंस्कृतिरक्षणाधया भारतवर्षस्यानेकराज्याणां प्रति-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

निधिभिः बेंगलूरु महानगरे 'बसवसमिति' रिति केन्द्रसंस्थैका वर्षद्वय पूर्वं संस्थापिता।

अस्याश्च समितेरध्यक्षाः श्रीमन्महाराज जयचामराज ओडेयर् बहद्दूर् महोदयाः। तथा च केरलराज्यपालाः श्री भगवान् सहाय् महोदयाः, केन्द्रीयौद्योगिकसचिवाः श्री डि. संजीवय्य महोदयाः, मैसूर्-मद्रास्-महाराष्ट्र राज्याणां मुख्यमन्त्रिणः श्री एस्. निजलिंगप्प महोदयाः, श्री एम्. भक्तवत्सलं महोदयाः, श्री वि. पि. नायक् महोदयाश्चोपाध्यक्षाः। श्री वि. डि. जत्तिमहोदयाः कार्याध्यक्षाः, डा॥ डि. सि. पावटे महोदयाः कोशाध्यक्षाः, श्री अन्नदानय्य पुराणिक महोदयाः प्रधान कार्यदर्शिनश्चेति स्थानापन्नाः सन्ति।

इयं च समितिः सम्प्रति तीव्रगत्या कार्ये प्रवृत्ता। महानुभावस्य बसवेश्वरस्य तत्समकालीनानां शिवशरणानां च चरितं साहित्यं तद्विषयकानि शासनानि च सशास्त्रीयं संशोध्य विश्वस्य प्रमुखभाषास्वपि तान्यनूद्य प्रकाशनम्, तेषामुदात्ततत्त्वानां प्रचारार्थं सभा-सम्मेलनादिकस्य संयोजनम्, शतमानोत्सवादिकस्य चाचरणम्, बसवकल्याणनगरेऽनुभवमण्टप-ग्रन्थसंशोधनकेन्द्र-कायकविद्यापीठादीनां संस्थापनम्, बेंगलूरु नगरे 'बसवभवन' निर्माणं, 'बसवसन्देश' नामकपत्रिकाप्रकटनमित्याद्यनेक महत्वपूर्णकार्याणां निर्वहणार्थं प्रसिद्धा विद्वांसः संशोधकाः कलाविदस्तत्त्ववेत्तारश्च समुद्युक्ताः सन्तीति निवेदयितुं समुत्सुकमस्मच्चेतः।

आमोदकरोऽयं विषयो यदेकस्मिन्नेव वर्षे समितेः प्रगतिर्महतीति। तस्याः शाखोपशाखाः भारतवर्षस्य कतिपयराज्येषु संस्थापिताः। सर्वधर्मीयाः समितेः सदस्यतां स्वेच्छयैव स्वीकृतवन्तः। आगामिवर्षे भगवतो बसवेश्वरस्याष्टमशतमानोत्सवं भारतवर्षस्य समस्तराज्येषु विश्वस्य प्रमुखराष्ट्रेषु च अभूतपूर्वं समाचरितुं पूर्वभावीन्यायोजनानि सोत्साहं कार्यगतानि। इयं च बसवसमितिः शाश्वत्यन्ताराष्ट्रीया संस्था। अष्टमशतसांवत्सरिकोत्सवस्य समाचरणानन्तरमपि तस्याः कार्यकलापा निरन्तरं प्रचलन्त्येव।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

बसववचनामृतम्

श्रीबसवेश्वरस्य कन्नडभाषागतसहस्राधिकेषु मूलवचनेषु सम्प्रति तावदष्टोत्तरशतवचनानां संग्रहः 'बसववचनामृतम्' इति नाम्ना प्रकाशितः। हिन्दी-मराठी-गुजराती-उर्दू प्रभृति भाषास्वनुवादाः प्रकाशनार्थं संसिद्धाः।

'बसववचनामृत'स्य संस्कृतानुवादकानामास्थानविदुषः श्री एम्. जी. नंजुण्डाराध्य महोदयानां समितिरियं हार्दिकीं कृतज्ञतां प्रकटयति। अत्र च सहृदां बेंगलूरस्थ श्री सर्पभूषणशिवयोगीश्वर मठाध्यक्षाः श्री नि. प्र. शिवकुमारस्वामिनः, श्री. नि. प्र. महालिंगेश्वरस्वामिनः दुधनी, श्री प्रो. एन्. रंगनाथशर्मा, श्री नागभूषणशास्त्री, पगडदिन्नि श्री बसवराज शास्त्री, प्रो. के. नरसिंहाचार्यः, श्री. एच्. देवीरप्प, डा. एच्. तिप्पेरुद्रस्वामी, श्री एम्. एस्. बसवराजय्य, प्रो. श्री ए. एल्. हिरेमठ, प्रो. श्री एच्. पी. मल्लेदेवरु, प्रो. श्री जी. एम्. उमापति शास्त्री, श्री पी. एस्. राजशेखरय्य प्रभृतीनां विदुषां सौहार्दं संस्मरणीयम्।

ग्रन्थस्यास्य प्रकाशनार्थं धनं वितीर्योपकृतवतोः बेंगलूरस्थ श्री आर्. चन्द्रशेखरय्य-श्रीमती आर्. सी. सुब्बम्मा दम्पत्योरौदार्यमविस्मरणीयं प्रशंसनीयञ्च।

बसवसमितेः प्रार्थनामङ्गीकृत्य भगवतो बसवेश्वरस्य कन्नडवचनानां संस्कृतानुवादरूपोऽयं ग्रन्थः आधुनिकजगति सुप्रसिद्धानां दार्शनिकानामग्रपङ्क्तौ विलसद्भिः भारतवर्षस्य सन्मान्य राष्ट्रपतिभिः 'भारतरत्न' डा. सर्वपल्ली राधाकृष्णमहोदयैरस्मिन् सुदिने समुद्घाटितो भवतीति हर्षावहोऽयं विषयः। तदर्थं सम्माननीयानां सुगृहीतनामधेयानां राष्ट्राध्यक्षमहोदयानां सप्रश्रयमनन्ता धन्यवादाः समर्प्यन्ते। ग्रन्थस्यास्य उद्घाटनावकाशप्रदातारो विश्वपरिषदस्सञ्चालका अपि धन्यवादार्हाः।

अचिरेणैव कालेन मुद्रितवतां बेंगलूर नगरस्थ प्रभामुद्रणालयाधिकारिणां च धन्यवादाः समर्प्यन्ते।

बसवसदनम्
श्री सर्पभूषण मठः
बेंगलूर-९
२७-५-१९६६

ब. दा. जत्ति
अध्यक्षः
बसवसमितिः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ॐ

॥ बसववचनामृतम् ॥

१

उदकनिगूढाग्निरिव
सस्यविलीनरसरुचिरिव
कोरकाभ्यन्तरपरिमल इव
कूडलसङ्गमदेव भवदस्तित्वं
कन्यकायाः स्नेहवदासीत् ॥

२

यत्र यत्र दृष्टिस्तत्र तत्र त्वमेव देव
सकलविस्तृतस्वरूपस्त्वमेव देव
विश्वतश्चक्षुस्त्वमेव देव
विश्वतो मुखस्त्वमेव देव
विश्वतो बाहुस्त्वमेव देव
विश्वतः पादस्त्वमेव देव
कूडलसङ्गमदेव !

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

३

जगद्विपुलं वियद्विपुलं ततो विपुलं
भवद्वैपुल्यम्
पारे पातालं भवतः श्रीचरणः
पारे ब्रह्माण्डं भवतः श्रीमुकुटः
अगम्यागोचराप्रतिमलिङ्गरूप
कूडलसङ्गमदेव
करतलमधिरुह्य मे चुलुकोऽभवः भोः ।

४

एकं सन्नामान्यनन्तानि
पतिरेकः परमपतिव्रतायाः
परस्याभिवन्दने कर्तयति कर्णनासम्
किं ब्रवीमि बहुदैवोच्छिष्टभोजिनाम्
कूडलसङ्गमदेव !

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

५

क्षुद्रपर्वतभागेषु ग्राममार्गस्थलेषु च ।
वापीकूपतटाकेषु पुष्पाढ्यसस्यशाखिषु ॥ १ ॥
शृङ्गाटके ग्राममध्ये पत्तनाभ्यर्णभूमिषु ।
बृहद्वटतरोर्मध्ये गृहं कृत्वा निरन्तरम् ॥ २ ॥
दोग्ध्रीं माहिषिकां चैव शिशुं गर्भवतीं (पृथक्) ।
सद्यः प्रसूतिकां गौरीं कन्यकां चापि (निर्दयम्) ॥ ३ ॥
धृत्वाश्नन्त्यो भिक्षया च (जीवन्त्यः क्षुद्रदेवताः) ।
मारि-बीराः-खेचराद्याः भूतप्रेतादिसंज्ञकाः ॥ ४ ॥
काळ-धूळाः-केतकाख्याः शताधिकघटा मताः ।
तेषां "कूडलसङ्गेश शरण्योऽसीति" केवलम् ॥ ५ ॥
भावना दण्ड एवैको नालं किमु विभेदने ॥

६

प्रसन्ने त्वयि पल्लवति स्थाणुः
प्रसन्ने त्वयि दोग्धि वन्ध्या
प्रसन्ने त्वयि अमृतायते विषम्
कूडलसङ्गमदेव
प्रसन्ने त्वय्यग्रत एव सकलसम्पदः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

७

न विश्वसन्ति न स्निह्यन्ति वृथाह्वयन्ति
न विदन्ति विश्वसितुमपीमे मनुजाः
विश्वस्याहूते नोत्तरति किं "ओं" इति शिवः ?
विना स्नेहविश्वासौ वृथाह्वानकारिणाम्
उद्घोषय काहळामित्युवाच
कूडलसङ्गमदेवः ॥

८

वदन्ति नादप्रियः शिव इति
किं शिवो नादप्रियः ।
वदन्ति वेदप्रियः शिव इति
किं शिवो वेदप्रियः ।
नादतो रावणस्यार्धायुरभवत् ।
वेदविदो ब्रह्मणः शिरश्छिन्नमभवत् ।
न नादप्रियो नापि वेदप्रियः
भक्तिप्रियो हि कूडलसङ्गमदेवः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

९

बृहन्तमापणं कृत्वा वसुधायां वणिग्वरः
उपविष्टो महादेवश्रेष्ठी वाणिज्यकर्मणि ॥ १ ॥
सामरस्ये वदत्याशु वैमनस्ये न भाषते ।
न जयेत् कणिकार्धं च कणिकां वा न मुञ्चति ॥ २ ॥
पश्य, कूडलसङ्गेशकौशलं चाम्र, साम्प्रतम् ॥

१०

कामेन किं लिङ्गप्रेमिणः ?
क्रोधेन किं शरणसंवेद्यस्य ?
लोभेन किं भक्तिलाभेप्सोः ?
मोहेन किं प्रसादसंवेदिनः ?
कुतो वा हृदयशुद्धिर्मदमत्सराविष्टस्य ?
प्रसीदति प्रशस्तेषु
कूडलसङ्गमदेवः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

११

गृहे गृहपतिरस्ति वा न वा ?
देहल्यां तृणान्यङ्कुरितानि
पांसु पूरितं च गृहाभ्यन्तरम्
गृहे गृहपतिरस्ति वा न वा ?
पूरयित्वानृतं वपुषि, विषयांश्च मनसि
नास्ति गृहे गृहपतिः
कूडलसङ्गमदेव ॥

१२

अन्या रीतिर्मदीयशीलस्य
अन्या रीतिर्मदीयवचनस्य
किञ्चिदपि नैर्मल्यं नास्ति मयि भोः
वचनानुगुणं यदि शीलं समीक्ष्यते तर्हि—
निवसति हृदये
कूडलसङ्गमदेवः ॥

१३

कोकस्य चिन्ता खलु चन्द्रिकायाः
पद्मस्य चिन्ता ह्युदयस्य भानोः ।
मकरन्दचिन्ता मधुपस्य नित्यम्
मह्यं सदा सङ्गमदेवचिन्ता ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

१४

उदिते चन्द्रे वर्धते वारिधिः
क्षीणे तस्मिन् क्षीयते च
राहूपरुद्धे चन्द्रे किमम्बुधिना
कृतः कोलाहलः ?
आचान्तेचाम्बुधौ मुनिना
किमुपरोधः कृतश्चन्द्रेण ?
कस्य कोऽपि न बन्धुः ।
नास्ति सखा विपन्नस्य
त्वमेव बन्धुर्लोकस्य
कूडलसङ्गमदेव ॥

१५

पङ्के पतितो दीनः पशुः, किं वा कुर्यात्
विना पादताडनम् ?
शिव, शिव ! नष्टोऽहं, प्रणष्टोऽहम् भोः ।
उद्धर मां भवन्मनसोऽन्तिकम् ।
पशुरहं, पशूनां पतिस्त्वम् ।
चौर्यजीविनं मत्वा मां ताडनात्प्रागेव प्रभो ।
कुरु तथैव यथा त्वमेव न निन्द्यसे
कूडलसङ्गमदेव ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

१६

कुरु मम कायं प्रवालम्
कुरु मम शीर्षं ककुभम्
कुरु मम धमनीं तन्त्रीम्
कुरु करशाखां वीणाकोणम्
गाय, ततो द्वात्रिंशद्रागम् ।
वादय, (वीणां) वक्षोनिहतां
कूडलसङ्गमदेव ॥

१७

निर्भक्तिः या पूजा, निस्नेहं यत् कर्म
सा पूजा, तत् कर्म
चित्रितरूपं भोः ।
चित्रगतश्च रसालः ।
नास्ति सुखं संश्लेषे
नास्ति रुचिश्चास्वादे
कूडलसङ्गमदेव
सैषा दाम्भिकभक्तिः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

१८

आपूर्य नामामृतं वचसि
आपूर्य त्वत्स्मरणं मनसि
आपूर्य त्वन्मूर्तिं चक्षुषि
आपूर्य त्वत्कीर्तिं श्रवसि
कूडलसङ्गमदेव
भ्रमरो भवामि भवच्चरणकमलयोः ॥

१९

स्निह्यामि विश्वसिमि परवशोऽस्मीति
ब्रवीमि चेत्
परीक्षसे त्वं तनुं विचाल्य
परीक्षसे त्वं मनो विचाल्य
परीक्षसे त्वं धनं विचाल्य
न बिभेमि चेदेभ्यः
भक्तिकम्पितोऽस्मत्कूडलसङ्गमदेवः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

२०

किम्फलमर्थरेखया विनायुष्यरेखया ?
किं वा फलं चन्द्रायुधेन कातरकरस्थितेन ?
किं फलं मुकुरेणान्धहस्तस्थितेन ?
किं फलं माणिक्येन मर्कटकरस्थितेन ?
किं फलमज्ञातकूडलसङ्गमशरणानां
हस्तस्थितेनापि लिङ्गेन
शिवपथज्ञानं विना ?

२१

पूर्वं पालित्यात् कपोलस्य
सङ्कोचाच्चिबुकस्य
वेल्लितत्वात् शरीरस्य
पूर्वं पतनाद्दन्तस्य
भुग्नत्वात्पृष्ठस्य
पारतन्त्र्यादात्मनः
पूर्वं हस्तेन जान्ववलम्ब्य
दण्डस्य धारणात्
पूर्वं वार्धक्यवैरूप्याद्देहस्य
अवमर्शनाच्च कृतान्तस्य
पूजय कूडलसङ्गमदेवम् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

२२

तदाद्यान्येद्युरिति मा वादीः
अद्यैव परं "शिवः शरणमिति" वदतः
अद्यैव परं "हरः शरणमिति" वदतः
अद्यैव परं कूडलसङ्गमदेवं निरन्तरं स्मरतः ॥

२३

विज्ञापयत्सु अस्मदीयेषु
वदत शुभलग्नं भोः
राशि-कूट-ऋणसम्बन्धोऽस्तीति
कथयत भोः
वदत चन्द्रबलं ताराबलं चास्तीति
कथयत, श्वस्तोऽपि अद्यैव श्रेय इति
कूडलसङ्गमदेव पूजाफलं
भवदीयं भोः ॥

२४

किं क्रीडितेन, किं गीतेन, किं पठितेन
विना त्रिविधदासोऽहम् ?
किं न क्रीडति केकी ?
न गायति तन्त्री ?
न वा पठति कीरः ?
नाभक्तो रोचते कूडलसङ्गमदेवाय ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

२५

अरे रे पापकर्मकारिन्
अरे रे ब्रह्महत्याकारिन्
सकृदुच्चारय शरणोऽस्मीति ।
सकृदुच्चरितात् शरणशब्दात्
पलायन्ते पापकर्माणि ।
न पर्याप्ता हेमगिरयस्सर्वप्रायश्चित्तार्थम् ।
वद शरणागतोऽस्मीति
केवलं कूडलसङ्गमदेवाय ॥

२६

मर्त्यलोको नाम कर्तुः कर्मागारं भोः
अर्हा इह ये परत्रापि तेऽर्हाः
इहानर्हाः परत्रापि चानर्हा एव
कूडलसङ्गमदेव ॥

२७

पुण्यं च पापं च स्वायत्तं
पश्यत भोः ।
'आर्य' इत्युक्तौ स्वर्गः
'अरे' इत्युक्तौ नरकः
देव, भक्तवत्सल, प्रभो इत्युक्तौ
निवसति कैलासः
कूडलसङ्गमदेव ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

२८

देवलोकमर्त्यलोकौ नभिन्नौ पश्यत ।
सत्योक्तिरेव देवलोकः, मिथ्योक्तिरेव मर्त्यलोकः ।
आचार एव स्वर्गः
अनाचार एव नरकः
कूडलसङ्गमदेव त्वमेवात्र प्रमाणम् ॥

२९

यावदास्ते देवलोकमर्त्यलोकयोस्सीमा
तावन्नवेद्मि भवितुं शरणः ।
यदि मे विलयो मरणात्परं
स चास्वाद इव रसालाग्रस्य
कूडलसङ्गमदेव ॥

३०

लिङ्गे सम्यक्कर्माणः, लिङ्गे सदर्थवेदिनः
लिङ्गे सम्पत्-सम्बन्धवेदिनः
स्वामिभृत्यास्सर्वे
न याचे युष्मान्, न बिभीत ।
सन्ति मे मर्त्यलोके महागणाः ।
अतो विभजत युष्मासु मिथः
कूडलसङ्गमदेवस्य लोकम् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

३१

जगदिदं त्वन्माययाऽऽवृतम्
मन्मनसाऽऽवृतोऽसि त्वम्, पश्य !
जगतोऽपि त्वं बलीयान्
अयि भोः ! त्वत्तोऽप्यहं बलीयान्, पश्य !
मुकुरान्तर्हितमातङ्ग इव
मय्यन्तर्हितोऽसि
कूडलसङ्गमदेव ॥

३२

भो जम्बूद्वीपनवखण्डपृथिवीनिवासिनः श्रुणुत
उभयोः शपथद्वयम् ।
"निगृण्हामीति" भाषा देवस्य !
"विजेष्येऽहमिति" भाषा भक्तस्य !
निशितां सत्यासिधारां निकृष्य (कोशात्)
विजिग्यिरे सद्भक्ताः, पश्य
कूडलसङ्गमदेवम् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

३३

किं ब्रूयां समुद्रस्य महत्वम् ? स धरामाश्रितः ।
किं ब्रूयां धरायाः महत्वम् ? नागेन्द्रस्य फणामाश्रितोऽसौ ।
किं ब्रूयां नागेन्द्रस्य महत्वम् ? सः पार्वत्याः
कनिष्ठाङ्गुलौ मुद्रिकाऽभूत् ।
किं ब्रूयां पार्वत्याः महत्वम् ?
सा परशिवार्धाङ्गिनी जाता ।
किं ब्रूयां परशिवस्य महत्वम् ?
स च कूडलसङ्गमदेवशरणानां
मनश्शिखाग्रमास्थितः ॥

३४

रचयन्ति शिवालयं धनवन्तः
किमहं करवाणि ? रिक्तोऽस्मि ।
मम चरणावेव स्तम्भौ
देह एव देवालयः
शिर एव कनककलशं भोः !
आकर्णय कूडलसङ्गमदेव
नश्वरस्स्थावरः, शाश्वतस्तु जङ्गमः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

३५

मातङ्गो महान् अङ्कुशस्त्वल्प इति
वक्तुं शक्यते किम् ? नैवम् !
गिरिर्गरीयान् व्रजस्त्वल्प इति
वक्तुं शक्यते किम् ? नैवम् !
अन्धन्तमसं महत् ज्योतिस्त्वल्पमिति
वक्तुं शक्यते किम् ? नैवम् !
अज्ञानं महत् भवत्स्मरन्मनस्त्वल्पमिति
वक्तुं शक्यते किम् ? नैवम् !
कूडलसङ्गमदेव ॥

३६

ज्ञानबलादज्ञानस्य नाशं पश्य भोः
ज्योतिर्बलात्तमसो नाशं पश्य भोः
सत्यबलादसत्यस्य नाशं पश्य भोः
स्पर्शमणिबलादवलोहस्य नाशं पश्य भोः
कूडलसङ्गमशरणानामनुभावबलात्
मन्मनोमालिन्यनाशं पश्य भोः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

३७

इतस्ततो गमनाशक्तं
पङ्गुं कुरु मां देव !
इतस्ततो भ्रमित्वा दर्शनाशक्तं
अन्धं कुरु मां देव !
अन्यश्रवणाशक्तं बधिरं कुरु मां देव !
त्वदीय शरणचरणं विहाय
अन्यविषयानासक्तं कुरु मां देव
कूडलसङ्गमदेव !

३८

शिविकारूढ शुनक इव
दृष्ट्वा हेयं मुञ्चति नैव पूर्वस्वभावम्
निर्दह ! निर्दह !! मानसमेतत्
विषयाभिमुखम्
हे मृड, नैव ध्यातुं प्रभवति
त्वामनवरतम् ।
कुरु करुणां तव चरणस्मरणार्थम्
प्राञ्जलिरर्थये प्रभो
कूडलसङ्गमदेव ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

३९

तनुस्त्वदीया यदि नान्या मदीया तनुः
मनस्त्वदीयं यदि नास्ति मेऽन्यन्मनः
धनं त्वदीयं यदि नास्ति मेऽन्यद्धनम्
यदि त्वदीयमेतत्त्रितयं इति ज्ञानं तदा
किमस्ति मेऽन्यो विचारः
कूडलसङ्गमदेव ॥

४०

न बिभेम्यापततो भुजङ्गात्
न बिभेमि वह्नेः प्रज्वलतः ।
न वा निशितखड्गधारायाः ।
बिभेमि तावदेकतः, त्रस्यामि तावदेकतः
बिभेमि द्यूतात्परस्त्री-परधनरूपात् ।
किमभूद्रावणस्य पूर्वमभीतस्य ?
बिभेमि भोः, कूडलसङ्गमदेवः !

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

४१

नदीस्नाननिरता भ्रातरः
नदीस्नाननिरताः स्वामिनः
त्यजत भोः, त्यजत ।
परनारीसङ्गं त्यजत, परधनाभिषञ्च त्यजत !
विना त्यागमेषां नदीमज्जने
केवलं वहति नदी
कूडलसङ्गमदेव ॥

४२

यतो यतो विलोकेऽहं
ततो ततोऽभिकांक्षामि चेत्
शपामि त्वत्साक्षिकम्
त्वत्प्रमथसाक्षिकम्
भावये परवधूं महादेवीमहम्
कूडलसङ्गमदेव !

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

४३

यूयमगच्छत गजमारुह्य
यूयमगच्छत हयमारुह्य
यूयमगच्छत विलिप्य कुङ्कुमकस्तूरीं भोः !
किन्तु न बोधथ सत्यस्वरूपम् !
सद्गुणबीजान्युप्त्वा नासादयत फलानि ।
गर्वमतङ्गजमारुह्य
यूयमगच्छत विधिवशतां भोः
अविदित्वा कूडलसङ्गमदेवं
यूयमभवत भाजनं निरयस्य ॥

४४

दुर्गतिमापुः कृत्वा कृत्वा
विना सौमनस्यम्
दुर्गतिमापुः दत्वा दत्वा
विना च सौहार्दम्
करणे दाने यदि तु श्रद्धा तर्हि
सन्निहितः कूडलसङ्गमदेवः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

४५

किमर्थं कोपः स्वस्मै क्रुध्यते ?
किं तेन स्वस्य सौभाग्यम् ?
परस्य दौर्भाग्यम् ?
तनुगतकोपात् हानिः स्वस्य महत्वस्य
मनसः कोपात् हानिः स्वस्य च बोधस्य ।
गृहगतवह्निः स्वगृहमदग्ध्वा
न दहेदितरगृहं
कूडलसङ्गमदेव ॥

४६

नैराश्यं धने, निर्भयं प्राणेषु
द्वयमिदमाप्तं केन नरेण ?
न निराकुर्वन्त्यदृच्छोपनते शेवधौ ।
नास्त्यमिथ्यावादी प्राणापाये
नैराश्यं निर्भयत्वं च न दृश्यतेऽन्यस्य
विना त्वत्कृपापात्रशरणं
कूडलसङ्गमदेव ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

४७

किमर्थं प्रयतध्वं परिहर्तुं लोककौटिल्यम् ?
स्व स्व तनुं परिशोधयध्वं स्व स्व चित्तं सान्त्वयध्वम् ।
सान्त्वयथ मनांसि युष्मदीयानि
नाभिनन्दति रुदतः
प्रातिवेशिक कौटिल्याय
कूडलसङ्गमदेवः ॥

४८

प्रशंसत यूयं वीरं, व्रतिनं, भक्तं च
श्रुणुत भोः !
वीरो यदि वैरिणः शंसेयुः
व्रती यदि प्रमदाः शंसेयुः
भक्तो यदि जङ्गमाः शंसेयुः
यद्यस्ति निष्ठाऽस्मिन्वचसि
वितरत्यभीष्टं कूडलसङ्गमदेवः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

४९

आप्यायनाय (अन्नं) परिवेषयामि
लाञ्छनाय शरणोऽस्मि
नास्ति चेदाचारो लाञ्छनानुरूपः
'धिक्' इति ब्रवीमि कूडलसङ्गमदेव
त्वत्साक्षिकम् ॥

५०

पयोव्रतं, पयस्सारव्रतम्
पयस्साराभावे कृशरान्नव्रतम्
नवनीतव्रतं, गुडव्रतम्
कांश्चिदपि न पश्यामि
यवागूव्रतिनः !
कूडलसङ्गमदेवशरणेषु
मादारचन्नार्यस्तु
यवागूव्रती !

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

५१

पिबन्ति मद्यं खादन्ति मांसं कायव्यामोहेन
उपभुञ्जते पराङ्गनां दृष्टिव्यामोहेन
किं वा फलं लिङ्गलाञ्छनधारणेन
लिङ्गपथातिक्रमिणां जङ्गमनिन्दाभाजाम्
न निवार्यते कोण्डमारीमुखप्रवेशः
कूडलसङ्गमदेव !

५२

"किमर्थमागताः ?" "अपि कुशलिनः"
इत्युक्तौ
किं विनश्येत् भवच्छरीरसौभाग्यम् ?
"उपविशे"त्युक्तौ किं भवति स्थलमवटयुतम् ?
अविलम्बप्रतिवचने
भवतः शिरः उदरं च किं शीर्णे ?
माभून्नाम प्रदानं,
नास्ति गुणो यद्येकः
विना नासाच्छेदं किं विरमेत् पातयित्वा
कूडलसङ्गमदेवः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

५३

दृष्टभक्तानामञ्जलिं कुर्वन्नेव भक्तः
मृदुवचनमेव सकला जपाः
मृदुवचनमेव सकलानि तपांसि
सद्विनयोऽनुग्रहस्सदाशिवस्य
नान्यथा प्रसीदति
कूडलसङ्गमदेवः ॥

५४

उक्तिर्मुक्ताहार इव स्यात्
वाणी माणिक्यकान्तिरिव स्यात्
स्याद्भारती स्फटिकशलाकेव
उच्यते चेत् लिङ्गं तुष्ट्वा
साधु साध्विति ब्रूयात्
न स्यादाचारो वचनानुरूपः
कथं वा प्रसीदेत
कूडलसङ्गमदेवः ?

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamwadi Math, VARANASI,
Acc. No. 2722

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

५५

वचनमाद्यानां परुषं पश्य भोः !
अचलश्रद्धा भाव्या सदाशिवे लिङ्गे
श्रद्धयैव विजयसे त्वं, पश्य भोः !
कद्वधरस्य, मधुरमुदरस्य
निम्बस्येवास्वादः
कूडलसङ्गमशराणानां वचनस्य ॥

५६

क्षीरपूर इव सुगुडकर्दमे
शर्करसिकताफेनतरङ्गे
सति वचनेत्वाद्यानां
उत्खन्यान्यं कूपं
पिबतो लवणं वारि
गतिरिव समभून्मदीयमतेः
कूडलसङ्गमदेव ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

५७

शक्यते संभाषयितुं सर्पदष्टान्
शक्येत संभाषयितुं ग्रहाभिहतान्
पश्य, न शक्यते संभाषयितुं
धनग्रहाभिहतान्
प्रविशेद्यदि दारिद्र्यमन्त्रवादी
भाषन्ते ते सहसा
कूडलसङ्गमदेव ॥

५८

ज्वलति यदि चुल्ली शक्यमिह स्थातुम्
ज्वलति यदि पृथ्वी न शक्यते स्थातुम् ।
तटी यदि पिबेज्जलम्
वृतिर्यदि चरेत् सस्यम्
गृहिणी यदि स्वगृहे हरेद्धनम्
मातुस्तन्यं गरलीभूय
यदि शिशुं हन्यात्
कान् ब्रवीमि कूडलसङ्गमदेव !

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

५९

उच्छिष्टं पयो वत्सस्य
उच्छिष्टमुदकं मत्स्यस्य
उच्छिष्टं कुसुमं द्विरेफस्य
कथं वा पूजयामि ?
शिव शिव ! कथं पूजयामि !
न मे शक्तिर्दूरीकर्तुमेतदुच्छिष्टम्
स्वीकुरु, यदृच्छोपनतम्
कूडलसङ्गमदेव ॥

६०

मारि-मसणिकाख्याताः न सन्त्यन्याः पश्य भोः !
कास्विदिह मारिका ?
दृष्टिप्रमादो मारिका
जिह्वाप्रमादो मारिका
विस्मरणं कूडलसङ्गमदेवस्य
मारिका ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

६१

दृष्ट्वान्नकणं किं नाह्वयति काकः
सकलं स्वपरिवारम् ?
दृष्ट्वा कवलमेकं किं नाह्वयति कुक्कुटः
स्वीयं सकलं कुलम् ?
विना भक्तिपक्षं निकृष्टशिवभक्तः
काकाच्च कुक्कुटाच्च !
कूडलसङ्गमदेव ॥

६२

"कस्यायं" "कस्यायं" "कस्यायं"
इत्येवं मा भावय भोः !
"अयमस्माकं" "अयमस्माकं" "अयमस्माकं"
इति भावय भोः !
भावय मामौरसपुत्रम्
कूडलसङ्गमदेव !

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

६३

सम्पीड्य तनुं संश्राम्य मनः
अपि सन्ति प्रणता भवच्चरणम् ?
किं न दहेदियमुक्तिः ?
कूडलसङ्गमदेव
सन्तापश्शिवभक्तानां
सन्तापो महालिङ्गस्य ॥

६४

गृण्हन्ति पादं प्रणिपत्य भूमौ
सन्दृश्य श्वेतच्छत्रकाद्यैस्समेतान् ।
निर्धनाश्शरणा आगच्छन्ति यदि
"नास्त्यवकाशः" "दूरमपेत"
इति भाषन्ते ।
तानवपात्य मदीयस्वामी
किं न छिन्द्यान्नासां ?
कूडलसङ्गमदेवः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

६५

क्रुद्धेन कृता मञ्जनधारा रक्तधारैव
पापेनार्पितं कुसुमं निशितास्त्रजन्या क्षतिः
न जानेऽन्यं प्रियं मादारचन्नार्यात्
न जानेऽन्यं प्रियं डोहारकक्कार्यात्
व्यापत्तियुतोऽस्मदीयो मडिवाळमाचार्यः
एते खलु हितैषिणः भवदापदि भोः !
कूडलसङ्गमदेव ॥

६६

कृतवानहमिति मनसि स्फुरेद्यदि
पीडयेत् शिवशासनम् !
मा वादीः कृतं लिङ्गार्थमिति
मा वादीः कृतं जङ्गमार्थमिति
अहं कृतवानिति मनसि न भावयेद्यदि
तस्मै दद्यादिष्टं कूडलसङ्गमदेवः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

६७

"कृत्वा दत्वा लिङ्गं पूजित"मिति ब्रुवन्तः श्रुणुत भवन्तः !
अल्पमूल्यक्रीतां वहिरवमुच्य पादुकाम्
देवायतनं प्रविश्य वन्दमान इव
विना बाह्योपानहो ध्यानं, न तु ध्यायति देवम्
अतो न रक्षं द्रव्यं, रक्षसि चेत्
कुतो न भाव्यो भवः ?
तद्विनियोजय शरणार्थं-कूडलसङ्गमदेवस्य ॥

६८

म्रियते किं सर्पो वल्मीकताडनात् भोः ?
किं वा स्यादत्युग्रतपश्चरणेन ?
यदि नास्ति आत्ममनसोः शुद्धिः ?
कथमेनं विश्वसिति
कूडलसङ्गमदेवः ?

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

६९

स्यान्निष्ठा शरणस्य "परधनं नेच्छामीति" ।
स्यान्निष्ठा शरणस्य "परवधूं नेच्छामीति" ।
स्यान्निष्ठा शरणस्य "परहिंसां न करोमीति" ।
स्यान्निष्ठा शरणस्य "लिङ्गजङ्गमयोरभेद" इति ।
स्यान्निष्ठा शरणस्य "प्रसादः परमार्थ" इति ।
निष्ठारहितं (शरणं) नाभिनन्दति
कूडलसङ्गमदेवः ॥

७०

व्याधेन शशमानीतं क्रीणते युक्तमूल्यतः ।
मृतस्य भूपतेर्नैव पूगेन क्रीणते तनुम् ॥
शशस्य जीवितात् हन्त ! निकृष्टं नरजीवितम् ।
अतः श्रद्धस्व ननु भोः कूडलं सङ्गमेश्वरम् ॥

७१

स्वायत्तं रतिसुखं, स्वभोज्यं च भोजनं
युक्तं किमन्यैः कारयितुम् ?
स्वेनैव क्रियमाणमिष्टलिङ्गार्चनं
युक्तं किमन्यैः कारयितुम् ?
केवलमर्चयन्ति त्वां दम्भार्थम्
न तत्त्वतो जानन्ति त्वां
कूडलसङ्गमदेव !

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

७२

दूषकेन दीयते यदि ते राज्यं
माभूस्तदाश्रये केवलमाशया ।
अन्त्यजस्यापि शिवभक्तस्य
अन्तिके वरं भृत्यवर्तनम् ।
वरमेव किङ्करवर्तनम् ।
वन्यपत्रमप्यानीय तच्च शरावे संभर्ज्य
जीवनमेव साधु
कूडलसङ्गमदेव शरणैः सह ॥

७३

सर्पमुखस्थो भेक इव क्षुधया
उत्पतन्मक्षिकाभक्षणं कांक्षन्
शूलमारोहन् चोरः क्षीरघृतादिपीत्वा
जीवेत्कति दिनानि ?
श्रित्वा नश्वरदेहं, उक्त्वा मिथ्यावचनं
पोषयतो निजदेहं
नेच्छति कूडलसङ्गमदेवः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

७४

इन्द्रियाणि यदि निगृह्यन्ते
दोषगणास्संप्राप्यन्ते ।
अभिमुखमागत्यैतानि
पञ्चेन्द्रियाणि तं संबाधन्ते ।
अत्यजतां वा चंगळा-शिरियाळौ
किं दाम्पत्यसुखम् ?
अत्याक्षीद्वा किं दाम्पत्यसुखं
सिन्धुबल्लाळः भोगानुपभोगान्वा ?
श्रित्वा त्वां यदि कांक्षति परद्रव्यं परनारीं वा
दूरे भवति त्वच्चरणाब्जात्
कूडलसङ्गमदेवः !

७५

चरणे बद्धो ग्रावा
कण्ठे बद्धालाबूः
न प्लावयति ग्रावा
न निमज्जयतेऽलाबूः
एतद्रूपे संसाराब्धौ मग्नं
तारय कालान्तक
कूडलसङ्गमदेव ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

७६

पापिधनं प्रायश्चित्ताय
न तु सत्पात्रार्हम्
शुनकक्षीरं शुनकाय
न तु पञ्चामृताय
अर्थो व्यर्थस्सर्वो विनियुक्तः
कूडलसङ्गमशरणेभ्योऽन्यत्र ॥

७७

नान्यत् कांस्यात् भोजनभाजनम्
नान्यत् कांस्यात् दर्शनमुकुरम्
तदेव भाजनं तदेव मुकुरम्
मुकुरं मार्जनात्
ज्ञाते तत्त्वे शरणो, मनुजोऽज्ञाते
ज्ञात्वाराधय कूडलसङ्गमदेवम् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

७८

नार्द्रं भवति तदभिषेकेण
नैव च शुष्यति विस्मरणेन
निस्सारा भो निस्सारा
लिङ्गसमर्चा निस्सारा !
कूडलसङ्गमदेव
सेचिते जङ्गमे तृप्यति स्थावरम् ॥

७९

क्षीरेणाभिषिञ्चन्ति शिलाभुजङ्गे दृष्टे
दण्डेन तु घ्नन्ति जीवद्भुजङ्गे दृष्टे
वदन्त्यपेहीति भोक्तृजङ्गमे समागते
अन्नं निवेदयन्त्यभोक्तृलिङ्गाय ।
उपेक्षमाणाः कूडलसङ्गमशरणान् ।
भवन्ति शिलाहतलोष्टनिभाः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

८०

किं कुरुथ द्वैताद्वैतपठनेन ?
यदि शरणाग्नौ लाक्षाभूत्वा न द्रवथ !
किं वा लभते वचनमालया ?
कूडलसङ्गमदेव,
यावत्पश्यति नैक्यं स्थावरजङ्गमयोः ॥

८१

अद्यैवापततु श्वस्तनी विपत्
अधुनैवापतत्वद्यतनी विपत्
को वा बिभीयात्, को वा त्रस्येत् ?
"जातस्य मरणं ध्रुवम्"
कूडलसङ्गमदेवेन लिखितां रेखां
न शक्यते परिमार्ष्टुं
हरि-हर-विरिञ्चादिभिरपि ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

८२

किं न वरं जीवितं दिनपञ्चकं
साधुवादपुरस्सरम् ?
किं न वरं जीवितं दिनचतुष्कं
साधुवादपुरस्सरम् ?
किं न वरं जीवितं दिनत्रयं
साधुवादपुरस्सरम् ?
किं न वरं जीवितं दिनद्वयं
साधुवादपुरस्सरम् ?
"जीवितं शिवभक्तानां वरं पञ्चदिनानि च।
नाजकल्पसहस्रन्तु भक्तिहीनन्तु शङ्करि ॥"
कूडलसङ्गमशरणवचोऽनुगुणं
किं न वरं जीवितं दिनमेकमपि ?

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

८३

दर्शय साधोः परमशरणस्य चरणं मे
यः कुरुते 'दासोऽहं' तनुमानसपरिश्रमेण
का हानिः कृषिकायिककृत्येनापि !
पावनमस्य शरीरं, पावनमस्य च चित्तम्
पावनमस्य च कृत्यं, पावनमस्य वचस्सर्वम्
परमः सद्गुरुरेष उपदेष्टा यस्तस्य ।
कैलास इति संचिन्त्य प्रविश्यैतस्य मन्दिरम् ।
लिङ्गमर्चयते यस्तु जङ्गमस्सोऽतिपावनः ॥
एतादृशान् महाभागान् विश्वस्याहं पुनः पुनः ।
नमांसि कुर्वे भूयांसि तेभ्यः कूडलसङ्गम ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

८४

अवधारय विज्ञापनां देवदेव !
आविप्रादन्त्यजं यावत्
भावये भक्तान् सर्वान् समा इति ।
आविप्रात् श्वपचं यावत्
भावये भविनः सर्वान् समा इति ।
एवं मदीयं निश्चसिति मानसम् ।
यद्यस्ति तिलमात्रोऽपि सन्देहो वचने मम ।
दन्तदर्शनपर्यन्तं नासिकां छिन्दि सङ्गम ॥

८५

पृच्छ्यते चेत् गोत्रस्य नाम
किं स्थीयते तूष्णीं वचनमनुक्त्वा ?
आवर्ज्य मस्तकं लिख्यते भूमिः
किमिदं भोः !
किं वा हीयते यदि गोत्रं मादारचन्नार्यस्य ?
किं वा डोहारककार्यस्य कूडलसङ्गमदेव !

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

८६

विना रजसा नाश्रयो पिण्डस्य
समानो जलबिन्द्वोर्व्यवहारः
सर्वसमो विषयादिः ।
आशा-रोष-हर्षास्समाः ।
किं फलमध्ययनेन, किं श्रवणेन च ?
किं वा दृष्टं कुलीनतामानम् ?
"सप्तधातुसमं पिण्डं समयोनिसमुद्भवम् ।
आत्मजीवसमुत्पन्नं वर्णानां किं प्रयोजनम् ॥"
तापनाल्लोहकारः, धावनाद्रजकः
वयनात्तन्तुवायः, वेदाध्ययनाद्विप्रः ।
अस्ति जनिः किं कर्णाज्जगति ?
तस्मात् कूडलसङ्गमदेव,
कुलजस्स एव यो लिङ्गस्थलविज्ञाता !

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

८७

भोजने धारणे वदन्ति क्रियावैकृतम्
दाने प्रतिग्रहे मृगयन्ते सत्कुलम्
कथं ब्रवीमि तान् भक्तान् ?
कथं ब्रवीमि तान् योग्यान् ?
शृणु भोः, कूडलसङ्गमदेव
तदिदं श्वपचायाः शुद्धोदकस्नानमिव !

८८

किं वदामि शिरियाळं श्रेष्ठिनम् ?
किं वदामि माचार्यं रजकम् ?
किं वदामि कक्कार्यं चर्मकारम् ?
किं वदामि चन्नार्यं मातङ्गम् ?
ब्रूयां यदि विप्रोऽहमिति
तर्हि, हसेत् कूडलसङ्गमदेवः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

८९

हन्तक एव मातङ्गः, अभोज्यभोक्तैव श्वपचः
किं तत्कुलं, केषां वा कुलम् ?
सकलजीवात्मनां श्रेयःकांक्षिणः
कूडलसङ्गमदेवस्य शरणा एव कुलजाः ॥

९०

धीवरीतनयो व्यासः
मातङ्गीतनयो मार्कण्डेयः !
भेकीतनया मण्डोदरी !
मा कुलमन्विष्यत भोः
किं वा भवन्तः कुलेन पुरा भोः ?
साक्षादगस्त्यो व्याधः, दुर्वासाश्चर्मकारः ।
काश्यपो लोहकारः, नापितपुत्रः कौण्डिन्यमुनिः ।
त्रिभुवनविदितमिदं सर्वं भोः !
वचनमिदं कूडलसङ्गमदेवस्य
स्यान्नाम श्वपचोऽपि
यश्शिवभक्तस्सोऽयमेव कुलजः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

९१

कुलमदाभिनिवेशात् करोषि तारतम्यं जङ्गमे
किं तेन फलम् ?
नित्यलिङ्गार्चनमस्य प्रायश्चित्तम् ।
छलमदाभिनिवेशात् करोषि तारतम्यं लिङ्गेषु
यूथस्य पालको गोपः वृणोति काश्चिद्धेनूः
अतो, भक्ता तनुः, मनस्तावद्भवि !
कूडलसङ्गमदेव ॥

९२

एको देशः शिवगेहान्त्यजवीथ्योः,
एकं जलमाचमनशौचयोः,
एकं कुलमात्मज्ञानरतस्य,
मुक्तिफलमेकं षड्दर्शनानाम्,
स्थितिरेका कूडलसङ्गमदेव,
त्वदभिज्ञस्य ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

९३

आनीतो बलिमेष उत्सवहेतोः
तोरणपल्लवभक्षणनिरतः
आत्मविघातज्ञानाभावात्
पोषयति स्वं दग्धशरीरम्
जातस्तस्मिन् दिवसे
यातस्तस्मिन् दिवसे
किमयं हन्ता जीवति ?
कूडलसङ्गमदेव ॥

९४

प्रतिवचनं मां घ्नन्तीति
रुदिहि त्वं ननु हे छाग !
वेदमधीतवतां पुरतो रुदिहि त्वम् !
शास्त्र श्रुतवतां पुरतो रुदिहि त्वम् !
भवतो रोदनमाकर्ण्य
प्रतिकुरुते कूडलसङ्गमदेवः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

९५

कोऽस्ति धर्मो दयाहीनः ?
दया स्यात् सर्वजन्तुषु ।
दयैव मूलं धर्मस्य
नान्यथेच्छति सङ्गमः ॥

९६

मा चोरय मा मारय मा वद मिथ्यावचनम्
मा तावत्कुप्य परस्मान्मा याहि जुगुप्साम्
मात्मानं श्लाघस्वेतरं मोपालम्भस्व
सैषा शुद्धिरन्तरङ्गस्य
सैषा शुद्धिर्बहिरङ्गस्य ।
एषा रीतिः प्रसादनस्य
कूडलसङ्गमदेवस्य ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

९७

ताड्यते चेद्दुडनं करगतमेव
दुरुच्यते चेद्दुर्वचनं करगतमेव
प्राक्तनजननं कीदृशं वा भवतु
करगत एवाद्यतनो भोगः
कूडलसमङ्गदेव !
करगतमेव तवार्चनफलम् ।

९८

मत्तो नैव निकृष्टाः स्युः
नाधिकाश्शिवभक्तेभ्यः ।
अत्र साक्षी भवत्पादः
तथैव हृदयं मम ॥
एतद्दिव्यं परं मन्ये
सत्यं कूडलसङ्गम ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

९९

प्रहर्तॄन् मन्ये पोषकान्
दूषकान् मन्ये बान्धवान्
निन्दकान्मन्ये मातापितरौ
पापशङ्किनो मन्ये शासकान्
अपहसतो मन्ये आजन्मबान्धवान्
स्तावकान् मन्ये सुवर्णशूलारोपकान्
कूडलसङ्गमदेव ॥

१००

निष्ठुरन्यायनिष्ठोऽहं
न दाक्षिण्यपरोऽस्म्यहम् ।
विरोधी सर्वलोकस्य
शरणो भयवर्जितः ।
यतः कूडलसङ्गस्य
राजते राजतेजसि ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

१०१

कायक्लेशवशाद्भीतो नार्थये रक्ष मामिति ।
जीवनोपायतो भीतो न याचे देहि मे इति ॥
'यद्भाव्यं तद्भवत्येव' सन्तापास्सम्पदोऽपि वा ।
न याच्यन्ते न वार्यन्ते कथंचन कदाचन ॥
भवन्तं न त्यजाम्येव प्रार्थये नैव मानवम् ।
त्वन्नाम्ना प्रतिजानामि सत्यं कूडलसङ्गम ॥

१०२

अणुमपि सुवर्णस्य, तन्तुमपि वस्त्रस्य
अद्य वा परेद्युर्वा यदि याचे (स्वार्थं)
शपथं करोमि त्वन्नाम्ना तव पुरातननाम्ना
सकलं तव शरणार्थं नैव तु वेद्मि परं
कूडलसङ्गमदेव ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamawadi Math, Varanasi
Acc. No. 3109

१०३

करोमि कृषिकर्म गुरुपूजार्थम्
करोमि व्यवहारं लिङ्गार्चनार्थम्
करोमि परसेवां जङ्गमदासोहार्थम्
जाने यद्यत् कर्म करोमि
तत्तत् कर्मफलं मां प्रापयसीति ।
भवता दत्तं द्रव्यं त्वदर्थमेव विनियुञ्जे नान्यार्थम् ।
प्रतिजाने कूडलसङ्गमदेव
अर्पयामि सर्वं तव सन्निधौ ।

१०४

मदीयाः प्रशंसां ममाभीक्ष्णमुक्त्वा
सुवर्णस्य शूलादविध्यन् सुतीक्ष्णम् ॥
मदीयन्तु गात्रं तदोच्छूनमासीत्
प्रसादस्त्वदीयः शितास्त्रं बभूव ॥
खिन्नो न हा हन्त ! शक्नोमि सोढुम्
श्रेयःकांक्षी यदि त्वं मे यथा मां न स्पृशेत् स्तुतिः ।
तथा कुरुष्व धर्मात्मन् सदा कूडलसङ्गम ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

१०५

पदं ब्रह्मणो नैव कांक्षामि शम्भो !
पदं वा हरेर्नैव कांक्षामि शम्भो !
पदं नैव रुद्रस्य कांक्षामि शम्भो !
पदं नैव कस्यापि कांक्षामि शम्भो !
केवलं तव सद्भक्तपादज्ञानमहाफलम्
अनुत्तमं पदं मन्ये, देहि कूडलसङ्गम ॥

१०६

भक्तिरहितोऽहं रिक्तोऽस्मि भोः ।
भक्तिमयाचे कक्कार्यस्य गृहे
भक्तिमयाचे चन्नार्यस्य गृहे
भक्तिमयाचे दासार्यस्य गृहे
यदि सर्वेऽपि पुरातनाः
दास्यन्ति भक्तिभिक्षां
ननु पूर्णमेव मदीयभिक्षापात्रम्
कूडलसङ्गमदेव ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

१०७

आयाहि बसव कथय,
अपि सन्ति भक्ता मर्त्यलोके ?
नान्योऽस्ति नान्योऽस्ति नान्योऽस्ति भोः !
अस्म्यहमेको भक्तः
मर्त्यलोकस्थाः सर्वे भक्ता जङ्गमा एव
लिङ्गं त्वमेव भोः
कूडलसङ्गमदेव ॥

१०८

भक्तिपृथिव्यामङ्कुरितं
गुरुरूपं बीजम्
पल्लवितं च ततो लिङ्गरूपेण
लिङ्गपल्लवादुपरि कुसुमितं विचारेण
आचारस्तत्र शलाटुः
फलितं च ततो निष्पत्तिरूपेण
वृन्तं विहाय निष्पत्तिफलं यदि पतति
तदाददाति मह्यमिति लोभेन
कूडलसङ्गमदेवः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अनुबन्धः

वचनसंख्या

५. मारि-वीराः, काळ-धूळाः—क्षुद्रदेवताविशेषाः

७. मूले "नम्बिकरेदोडे" (ನಂಬಿಕರೆದೊಡೆ)—इत्यत्र 'नम्बि 'पदं तन्नामके शिवशरणे, विश्वासे च श्लिष्टम्। नम्बिनाम्ना भक्तवरेणेति शेषः।

१०. "तल्लिङ्गं ब्रह्मशाश्वतम्" "ओङ्कारं लिङ्गमाख्यातम्"
शरणः—सतीचाहं पतिर्लिङ्गं हृदि युक्तःस्वयं प्रभुः।
प्रापञ्चिकसुखं नास्ति शरणस्थलमुत्तमम्॥ (अनुभवसूत्रे)

१८. "तुम्बि" (ತುಂಬಿ) इति पदं मूले भ्रमरपर्यायवाचकम्।
तच्च पदं आपूरण-भ्रमरयोः संश्लिष्टमित्यवधेयम्।

४१. मूले नदीवाचको (ತೊರೆ) शब्दः वर्जन-नदीति अर्थद्वये श्लिष्टः।

५०. मादारः—पञ्चमजातिविशेषः। चन्नार्यस्तु तत्र जातोऽपि शिव-भक्तिमहिम्ना शिवानुग्रहमवाप्य शिवशरणेषु परिगणितः।

५१. कोण्डमारी—क्षुद्रदेवताविशेषः।

५५. परुषं—स्पर्शमणिः। यस्य सम्पर्कात् लोहोऽपि सुवर्णत्वं लभते।

६०. मारि-मसणिकाः-परपीडासक्ताः क्षुद्रदेवताविशेषाः।

६५. मादारडोहारशब्दौ पञ्चमजातिविशेषवाचकौ।
व्यापत्तिः—आपदि प्राणप्रदानम्। तद्वान् आपद्बान्धवः।

७८. जङ्गमः—"एकमूर्तिस्त्रिधा भक्ता गुरुलिङ्गन्तुजङ्गमाः"।
वीरशैवागमोक्तः उपास्यवस्तुविशेषः॥

८३. दासोऽहं भावः—शरीरादिपदार्थांश्च दत्वा दानं समर्पणम्।
समर्प्य सोऽहमस्मीति दासोहं भाव उच्यते॥ (अ.सू.)

८४. भवी—भवाभिमुखः। जननमरणधर्मी मानवः।

८६. पिण्डः—बहुजन्मकृतैः पुण्यैः प्रक्षीणे पापपञ्जरे।
शुद्धान्तःकरणो देही पिण्डशब्देन गीयते॥ (सि.शि. ५-३१)

९१. वृणोति—अभिजानाति (ಗುರುತಿಸು)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अणुमपि सुवर्णस्य १०२
अद्यैवापततु ८१
अन्या रीतिः १२
अरे रे पापकर्मकारिन् २५
अवधारय विज्ञापनाम् ८४
आनीतो बलिमेषः ९३
आपूर्य नामामृतम् १८
आप्यायनाय ४९
आयाहि वसव १०७
इतस्ततो गमनाशक्तम् ३७
इन्द्रियाणि यदि ७४
उक्तिर्मुक्ताहार इव ५४
उच्छिष्टं पयः ५९
उदकनिगूढाग्नेरिव १
उदिते चन्द्रे १४
एकं सन्नामानि ४
एको देशः ९२
करोमि कृषिकर्म १०३
कस्यायं ६२
कायक्लेशवशाद् १०१
कामेन किम् १०
किं क्रीडनेन २४
किं कुरुथ ८०
किं न वरं ८२
किं फलमर्थरेखया २०
किं ब्रूयां समुद्रस्य ३३
किमर्थं कोपः ४५
किमर्थं प्रयतध्वम् ४७
किमर्थमागताः ५२
किं वदामि ८८
कुरु मम कायम् १६
कुलमदाभिनिवेशात् ९१
कृतवानहम् ६६
कृद्धेन कृता ६५
कृत्वा दत्वा ६७
कोकस्य चिन्ता १३
कोऽस्ति धर्मः ९५
क्षीरपूर इव ५६
क्षीरेणाभिषिञ्चन्ति ७९
क्षुद्रपर्वतभागेषु ५
गृण्हन्ति पादम् ६४
गृहे गृहपतिः ११
चरणे बद्धो ग्रावा ७५
जगद्विपुलम् ३
जगदिदं त्वन्मायया ३१
ज्ञानबलात् ३६
ज्वलति यदि ५८
तदाद्यान्येद्युरिति २२
तनुस्त्वदीया ३९
ताडयते चेत् ९७
दर्शय साधोः ८३
दुर्गतिमापुः ४४
दुषकेण दीयते ७२
दृष्टभक्तानाम् ५३
दृष्ट्वान्नकणम् ६१
देवलोकमर्त्यलोकौ २८
धीवरीतनयः ९०
नदीस्नाननिरताः ४१
न बिभेमि ४०
न विश्वसन्ति ७
नार्द्रं भवति ७८
नान्यत् कांस्यात् ७७

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

निर्भक्तिर्या पूजा १७
निष्ठुरन्यायनिष्ठः १००
नैराश्यं धने ४६
पङ्के पतितः १५
पदं ब्रह्मणो नैव १०५
पयोव्रतम् ५०
पापिधनम् ७६
पिबन्ति मद्यम् ५१
पुण्यं च पापं च २७
पूर्वं पालित्यात् २१
पृच्छ्यते चेत् ८५
प्रतिवचनं माम् ९४
प्रसन्ने त्वयि ६
प्रशंसत यूयम् ४८
प्रहर्तॄन् मन्ये ९९
बृहन्तमापणम् ९
भक्तिपृथिव्याम् १०८
भक्तिरहितोऽहं १०६
भोजने धारणे ८७
भो जम्बूद्वीप ३२
मत्तो नैव निकृष्टाः ९८
मर्त्यलोको नाम २६
मदीयाः प्रशंसाम् १०४
मा चोरय ९६
मातङ्गो महान् ३५
मारि-मसणिकाद्याः ६०
म्रियते किं सर्पः ६८
यतो यतो विलोकेऽहं ४२
यत्र यत्र दृष्टिः २
यावदास्ते देवलोकमर्त्यलोकयोः २९
यूयमगच्छत ४३
रचयन्ति शिवालयम् ३४
लिङ्गे सम्यक्कर्माणः ३०
वचनमाद्यानां ५५
वदन्ति नादप्रियः ८
विज्ञापयत्सु २३
विना रजसा ८६
व्याधेन शशम् ७०
शक्येत सम्भाषयितुम् ५७
शिबिकारूढः शुनकः ३८
सम्पीड्य तनुम् ६३
सर्पमुखस्थो भेकः ७३
स्यान्निष्ठा शरणस्य ६९
स्वायत्तं रतिसुखम् ७१
स्निह्यामि २९
हन्तक एव ८९

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY,
Jangamwadi Math, VARANASI.
Acc: No. 2109
CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri